

# śānti pañcakam



ōm̐ śaṁ nō̍ mi̱tra-śśaṁ varu̍ṇaḥ | śaṁ nō̍ bhavatvarya̱mā | śaṁ na̱ indrō̱ br̥̥ha̱spati̍ḥ | śaṁ nō̱ viṣṇu̍rurukra̱maḥ | namō̱ brahma̍ṇē | nama̍stē vāyō | tvamē̱va pra̱tyakṣa̱ṁ brahmā̍si | tvamē̱va pra̱tyakṣa̱ṁ brahma̍ vadiṣyāmi | r̥̱taṁ va̍diṣyāmi | sa̱tyaṁ va̍diṣyāmi | tanmāma̍vatu | tadva̱ktāra̍mavatu | ava̍tu̱ mām | ava̍tu va̱ktāram̎ || ōm̐ śānti̱ḥ śānti̱ḥ śānti̍ḥ || 1 ||

śaṁ nō̍ mi̱tra-śśaṁ varu̍ṇaḥ | śaṁ nō̍ bhavatvarya̱mā | śaṁ na̱ indrō̱ br̥̥ha̱spati̍ḥ | śaṁ nō̱ viṣṇu̍rurukra̱maḥ | namō̱ brahma̍ṇē | nama̍stē vāyō | tvamē̱va pra̱tyakṣa̱ṁ brahmā̍si | tvāmē̱va pra̱tyakṣa̱ṁ brahmāvā̍diṣam | r̥̱tama̍vādiṣam | sa̱tyama̍vādiṣam | tanmāmā̍vīt | tadva̱ktāra̍māvīt | āvī̱nmām | āvī̎dva̱ktāram̎ || ōm̐ śānti̱ḥ śānti̱ḥ śānti̍ḥ || 2 ||

sa̱hanā̍vavatu | sa̱hanau̍ bhunaktu | sa̱ha vī̱rya̍ṁ karavāvahai | tē̱ja̱svi nā̱vadhī̍tamastu̱ mā vi̍dviṣā̱vahai̎ || ōm̐ śānti̱ḥ śānti̱ḥ śānti̍ḥ || 3 ||

namō̍ vā̱cē yā cō̍di̱tā yā cānu̍ditā̱ tasyai̍ vā̱cē namō̱ namō̍ vā̱cē namō̍ vā̱caspata̍yē̱ nama̱ r̥̥ṣi̍bhyō mantra̱kr̥̥dbhyō̱ mantra̍patibhyō̱ mā mām r̥̥ṣa̍yō mantra̱kr̥̥tō̍ mantra̱pata̍ya̱ḥ parā̍du̱rmāऽhaṁ r̥̥ṣī̎nmantra̱kr̥̥tō̍ mantra̱patī̱n parā̍dāṁ vaiśvadē̱vīṁ vāca̍mudyāsagṁ śi̱vāmada̍stā̱ṁ ju̱ṣṭā̎ṁ dē̱vēbhya̱ḥ śarma̍ mē̱ dyauḥ śarma̍ pr̥̥thi̱vī śarma̱ viśva̍mi̱daṁ jaga̍t | śarma̍ ca̱ndraśca̱ sūrya̍śca̱ śarma̍ brahmaprajāpa̱tī |
bhū̱taṁ va̍diṣyē̱ bhuva̍naṁ vadiṣyē̱ tējō̍ vadiṣyē̱ yaśō̍ vadiṣyē̱ tapō̍ vadiṣyē̱ brahma̍ vadiṣyē sa̱tyaṁ va̍diṣyē̱ tasmā̍ a̱hami̱daṁ u̍pa̱stara̍ṇa̱ṁ upa̍str̥̱ṇa



# शान्ति पञ्चकम्



upa̱stara̍ṇaṁ mē pra̱jāya̍i paśū̱nāṁ bhū̍yād upa̱stara̍ṇama̱haṁ pra̱jāya̍i paśū̱nāṁ bhū̍yāsa̱ṁ prāṇā̍pānau mr̥̱tyōrmā̍ pāta̱ṁ prāṇā̍pānau̱ mā mā̍ hāsiṣṭa̱ṁ madhu̍ mani̍ṣyē̱ madhu̍ jani̍ṣyē̱ madhu̍ vakṣyāmi̱ madhu̍ vadiṣyāmi̱ madhu̍matīṁ dē̱vēbhyō̱ vāca̍mudyāsagṁ śuśrū̱ṣēṇya̎ṁ manu̱ṣyē̎bhya̱staṁ mā̍ dē̱vā a̍vantu śō̱bhāya̍i pi̱tarōऽnu̍madantu || ōm̐ śāntiḥ śāntiḥ śāntiḥ || 4 ||

taccha̱ṁ yōrāvr̥̍ṇīmahē | gā̱tuṁ ya̱jñāya̍ | gā̱tuṁ ya̱jñapa̍tayē | daivī̎ sva̱stira̍stu naḥ | sva̱stirmānu̍ṣēbhyaḥ | ū̱rdhvaṁ ji̍gātu bhēṣa̱jam | śaṁ nō̍ astu dvi̱padē̎ | śaṁ catu̍ṣpadē || ōm̐ śānti̱ḥ śānti̱ḥ śānti̍ḥ || 5 ||



# शान्ति पञ्चकम्



ॐ शं नो मित्र–श्शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ १ ॥

शं नो मित्र–श्शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ २ ॥

सहनाववतु । सहनौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ ३ ॥

नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो मा मामृषयो मन्त्रकृतो मन्त्रपतयः परादुर्माऽहं ऋषीन्मन्त्रकृतो मन्त्रपतीन्



# शान्ति पञ्चकम्



परादां वैश्वदेवीं वाचमुद्यासगं् शिवामदस्तां जुष्टां देवेभ्यः शर्म मे द्यौः शर्म पृथिवी शर्म विश्वमिदं जगत् । शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्मप्रजापती ।
भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिदं उपस्तरणं उपस्तृण उपस्तरणं मे प्रजायै पशूनां भूयाद् उपस्तरणमहं प्रजायै पशूनां भूयासं प्राणापानौ मृत्योर्मा पातं प्राणापानौ मा मा हासिष्टं मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासगं् शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ ४ ॥

तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ ५ ॥